# mAnasollasastutiH by Appayya Dixit

# માનસોલ્લસસ્તુતિઃ શ્રીમદપ્પય્યાદીક્ષિતેન્દ્રૈઃ વિરચિતા

## Document Information

```
Text title : mAnasollasa stuti
File name : mAnasollasa.itx
Category : misc, sahitya, appayya-dIkShita
Location : doc_z_misc_general
Author : Shri Appaya Dikshitar
Transliterated by : N.Balasubramanian bbalu at satyam.net.in
Proofread by : N.Balasubramanian bbalu at satyam.net.in
Latest update : August 28, 2021
Send corrections to : sanskrit@cheerful.com
```

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 14, 2023

*sanskritdocuments.org*

# mAnasollasastutiH by Appayya Dixit

# માનસોલ્લસસ્તુતિઃ શ્રીમદપ્પય્યાદીક્ષિતેન્દ્રૈઃ વિરચિતા

Introduction:

This is a short poem by the famous author. It consists of seventeen verses and is construced in the form of advice to the mind. The poet finds that the mind is now fully preoccupied with the affairs of the world, family and friends  to the extent that it is unable to think of the consequences of such preoccupation. The poem points out the consequences and also the way to escape them. The remedy is to start thinking of Lord Siva and worship Him.  One may continue to attend to personal matters but, should, at the same time engage the mind in thinking of the Lord. This will bring in all the prosperity one requires for a good life. It will also confer ever lasting peace which one cannot find by being busy with the world.  It is common to find saints and devotees addressing their mind and also other organs like the eyes to turn to the Lord for escape from the stresses and strain that the worldly life brings in its wake.

Some examples are given here.

1) Mana sambodha niyamanam - 10 verses by Bhartruhari in his Vairagya shatakam.

2) Manache Sloka of Sri Samartha Ramadasa of Maharashtra. This work is in Marathi language and has 205 verses.

3) Manoniyamanam (મનોનિયમનમ્ ।) by Saint

Sadasiva Brahmendra is a small but beautiful poem consisting of 13 verses addressed to the mind.

4) The saint has also composed many songs that address the mind, the tongue etc.

Some are:

(1)Bhaja re Gopalam manasa. (ભજ રે ગોપાલમ્ માનસ ।)

(2)Smara varam chetah smara Nanda Kumaram.
(સ્મર વારં ચેતઃ સ્મર નન્દકુમારમ્ ।)

(3)Bruhi Mukundeti Rasane (બ્રૂહિ મુકુન્દેતિ રસને ।)

(4)Manasa sancharare (માનસ સંચર રે)

(5)Bhaja re Yadhunatham (ભજ રે યદુનાથમ્ ।).

5) The saint Kulasekhara also addresses the organs in his Mukundamala. One of his popular poems is given here.

જિહ્વે કીર્તય કેશવં મુરરિપું ચેતો ભજ શ્રીધરં
પાણિદ્વન્દ્વ સમર્ચયાચ્યુતકથા-શ્રોત્રદ્વય ત્વં શ‍ૃણુ ।
કૃષ્ણં લોકય લોચનદ્વય હરે-ર્ગચ્છાઙ્ઘ્રિયુગ્માલયં
જિઘ્ર ઘ્રાણ મુકુન્દ-પાદ-તુલસીં મૂર્ધન્ નમાધોક્ષજમ્ ॥

Now let us go to the poem proper.

॥ શ્રી શિવમસ્તુ ॥

અયિ ભ્રાતશ્ચેતઃ પરમમુપદેશં શ્રુણુ મમ
સ્મરારેરર્ચાયાં પટુષુકરણેષુ સ્મર ફલમ્ ।
તવૈષાં પ્રેષ્યાણામુપરતિકૃતિશ્રાન્તિ મહતિ
ત્વાયૈકેન શ્વાસપ્રશમસમયે કિન્નુ સુકરમ્ ॥ ૧॥

અતિસ્થેમસ્ફીતાનપિ શિખરિણઃ પશ્ય ચલિતાન્
કિયંતં વા કાલં કિસલયમૃદુ સ્થાસ્યતિ વપુઃ ।
અસારેઽસ્મિન્પૂજાંઅયિ હૃદય શંભોર્ન કુરુષે
કદેદૃક્ તે લભ્યં કથય જડ તંત્રોપકરણમ્ ॥ ૨॥

ઇદાનીમત્યલ્પેષ્વયિ હૃદય કાર્યેષ્વતિ મહાન્
ઇયાન્ વ્યાસંગસ્તે ન કલયસિ યેન સ્મરરિપુમ્ ॥

અતિકંદદ્વંધુવ્યસનજલધાવર્તિ સમયે

    કિયાનાગંતા તે શિવ શિવ હતોસ્મ્યેવ ભવતા ॥ ૩॥

અયે ચેતશ્શાસ્ત્રાણ્યધિકમવગૂઢાન્યપિ
    મુધા ન યદ્યાસજ્જેથાઃ પશુપતિપદાંભોજભજને ।
તદિત્થં ભોક્તવ્યં ખલુ પુનરપિ પ્રેત્ય ભુવને
    મહદ્દુઃખં વર્ણગ્રહણસમયોપક્રમમિદમ્ ॥ ૪॥

કિયંતો ના ભૂવન્ હૃદયપરમપ્રેમવિષયાઃ
    પુરાજન્મસ્વદ્ય ક્વ ગતમિતિ જાનાસિ કિમુ તાન્ ।
વૃધા મોહં બંધુષ્વહિતપરિણામં ત્યજ સખે
    યદાસેવાદોષાત્ સ્મરસિ ન કદાઽપિ સ્મરરિપુમ્ ॥ ૫॥

અમી ચેત્ પુત્રાદ્યા-સ્તવ ભૃશતરં પ્રેમવિષયાઃ
    ભવિષ્યન્તો ન સ્યુઃ કિમુ જડ તથા ભાવિજનને ।
સદેવ ત્વય્યેવં સમુપજનિતાક્ષત્રયહતે
    કદા શંભોશ્ચિન્તા ભવતિ ભવભીતિપ્રશમની ॥ ૬॥

અનાપૃચ્છ્ય જ્ઞાતી-નવશ રુદિતોચ્છૂન-નયનાન્
    ગતિઃકા ન-સ્તાતેત્યતિ-કરુણમગ્રે વિલુટિતાન્ ।
અવશ્યં ગન્તવ્યં ખલુ તદહિતાનામપિ પુરસ્ત-
    દદ્યૈવ સ્નેહં ત્યજ હૃદય તેષ્વર્ચ્ય ગિરિશમ્ ॥ ૭॥

ઇદં સજ્જીભૂતં કૃતમિદ-મિદં કાર્યમધુને-
    ત્યયં વ્યર્થારંભસ્તવ બતમનશ્-શામ્યતુ કદા ।
  સખલ્વાગન્તા તે શિવભજનહીનસ્ય સમયસ્-
    સમુદ્યન્નિર્ઘોષજ્વલદશનિપાત પ્રતિભયઃ ॥ ૮॥

ત્વયા ગર્ભે માતુર્યદિહ ચિન્તિતમભૂત્ ત-
    દાલોચ્ય સ્વાન્તે વ્રજ શિવમકાર્યે ત્યજ રુચિમ્ ।
ગતો દૂરં મૂર્ખઃ ક ઇવ ખલુ વિત્તાર્જન ધિયા
    ચરેસ્સ્વૈરં ત્યક્ત્વા પ્રભુવરમૃણાદાનરસિકઃ ॥ ૯॥

અપથ્યા-દાહારાદપિ તવ કિયન્ માનસ ભયં
    મુહૂર્તાવસ્થાયિ જ્વરજઠર-ભારાદિકરણાત્ ।
અમુષ્માદશ્રાન્ત-પ્રવિતત ભવવ્યાધિજનનાત્
    મહેશે વૈમુખ્યાત્ કિમિતિ ન ભયં કિઞ્ચિદપિ ॥ ૧૦॥

ઇયંતંકાલં તે નિયતસહવાસેન જનિતા કિં-
    ઈષન્નાસ્ત્યન્તઃકરણ મયિ સૌહાર્દકણિકા ।
યથેચ્છં ભ્રાન્ત ત્વં વિહરવિષયારણ્ય-કુહરે
    ભજ શ્રીપાદાબ્જં સકૃદપિ પુરારેરનુદિનમ્ ॥ ૧૧॥

સ્થિતોઽસ્મિ ત્વાં પશ્યન્ ચિરમહિત એવં તવકૃતે
    મદર્થાસુ સ્થાણોર્હૃદય પરિચર્યાસુ વિમુખઃ ।
ઇદાનીન્નિર્વિણ્ણોઽસ્મ્યલમુપગતસ્તેઽદ્યસમયો
યદાત્મન્યપ્યાસ્થાં જહતિ સુહૃદર્થે કૃતવિદઃ ॥ ૧૨॥

અલભ્યેવપ્યર્થેષ્વધિક ચપલા-નક્ષપૃથુકાન્
    અતૃપ્તાનત્યર્થે સુચિરમનુવૃત્તાનપિ તથા ।
અશક્યં તે શંભોર્ભજન-મનુરુધ્યૈવ-મશુચીન્
    ઉપેક્ષૈવોપાયસ્તવ હૃદય તેષામુપશમે ॥ ૧૩॥

ઉપાયં તે ચેતઃ પરમુપદિશામિ સ્મરરિપોઃ
    પદાંભોજદ્વંદ્વે પરવશતયા રજ્યસિ યતઃ ।
અવશ્યં ભોક્તવ્ય-મનુદિન-મતર્ક્યોપગમનાં
    દશા-મન્ત્યાં-મન્તસ્સપદિ ગણયોપસ્થિતતરામ્ ॥ ૧૪॥

ચિરાત્ કશ્ચિત્વ્યાધઃ શિવ ઇતિ વસત્યદ્રિશિકહરે
    સ મે માયીભૂત્વા મતિમહર-દધ્દા સુખનિધિમ્ ।
સલગ્નશ્ચેદ્દૈવાત્ ક્વચનપથિપાશૈસ્મૃતિમયૈઃ
    સખે તં બધ્નીયાઃ હૃદય નિભૃતં દાસ્યતિ ધનમ્ ॥ ૧૫॥

બહિસ્ત્વં વૈય્યગ્ર્યં પ્રકટય પરં લૌકિકકૃતિ-
    ષ્વવર્જ્યાસુ સ્થૈર્યં ભજ પશુપતેઃ પાદભજને ।
વિટેષુ સ્નિહ્યન્તીમિવ બહિરસારૈ-રભિનયૈઃ
    ધને બધ્દાસંગાં ગણય ધિષણે વારવનિતામ્ ॥ ૧૬॥

મહાદેવધ્યાનાન્મમશરણમન્યન્ન કલયે
    ભવગ્રહગ્રાસોલ્લસિતભવવેગાદધિભુવિ ।
પ્રસીદ પ્રાગલ્ભ્યં તદિહ પરિગૃહ્યાદ્ય મહતો
    ભયાત્રાયસ્વૈનં ભગવતિ નમસ્તેઽસ્તુ ધિષણે ॥ ૧૭॥

॥ શ્રી શિવમસ્તુ ॥

Endoded by N. Balasubramanian bbalu@satyam.net.in

*mAnasollasastutiH by Appayya Dixit*

pdf was typeset on January 14, 2023

Please send corrections to *sanskrit@cheerful.com*